राजमातृविशेषः। यथा, राजतरङ्गिण्यां।४।२१३।
"ललितादित्यभूभर्त्तुर्वल्लभा चक्रमर्द्दिका ॥" )

चक्रयानं, क्ली, ( चक्रेण अन्वितं यानम्। ) रथादि। चक्रयुक्तवाहनम्। इत्यमरटीकायां रायमुकुटादयः॥

चक्ररदः, पुं, ( चक्रवद्वृत्तो रदः दन्तोऽस्येति। ) शूकरः। इति त्रिकाण्डशेषः॥

चक्रलक्षणा, स्त्री, ( चक्रे चक्राकारे दन्नौ मण्डलाकारे कुण्डादौ वा लक्षणं आरोग्याय चिह्नं आरोग्यसूचनमित्यर्थः यस्याः।) गुडूची। इति रत्नमाला॥ (चक्रं लक्षणं यस्य इति व्युत्पत्त्या। रथे विष्णौ च पुं॥ )

चक्रलताम्रः, पुं, ( चक्+रक्। चक्रः तृप्तिजनकः लताम्रः यत्र यस्य वा।) बहुरसालवृक्षः। इति राजनिर्घण्टः॥

चक्रला, स्त्री, ( चक्रं चक्राकारं लाति आदत्ते चक्राकारेण वर्द्धते इति यावत्। ला+कः तत-ष्टाप्।) उच्चटा। इत्यमरः। २। ४। १६०॥

चक्रवर्त्तिनी, स्त्री, ( चक्राकारेण वर्त्तते इति। वृत्+णिनिः। ) जनीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १५३॥ अलक्तकः। जटामांसी। इति राजनिर्घण्टः॥ ( चक्रं पृथ्वीचक्रं वर्त्तते अस्यां यद्वा चक्रं सेनाचक्रं अशेषव्यूहरचनयाधिष्ठितं सेनावृन्दं वर्त्तयितुं शीलमस्या इति। सर्व्वभूमेरधीश्वरी॥ चक्रेषु समूहेषु वर्त्तते या। यूथेश्वरी। यथा, कथासरित्सागरे। २०। ११४।
"एवं बाल्येऽपि जाताहं डाकिनीचक्रवर्त्तिनी॥")

चक्रवर्त्ती, [ न् ] पुं, ( चक्रं पद्माकारशुभचिह्नं करे वर्त्तते यस्य। वृत्+णिनिः। यद्वा चक्रं पृथ्वीचक्रं तेन वर्त्तते इति। वृत+णिनिः। ) समुद्रपरिवृतायाः सर्व्वभूमेरीश्वरः। तत्पर्य्यायः। सार्व्वभौमः २। इत्यमरः। २। ८। २॥ (यथा, शकुन्तलायां १ म अङ्के।
"जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव।
पुत्रमेवं गुणोपेतं चक्रवर्त्तिनमाप्नुहि॥" )
वास्तूकम्। इति राजनिर्घण्टः॥ (श्रेष्ठः। यथा, गीतगोविन्दे। १। २।
"वाग्देवताचरितचित्रितचित्तसद्मा
पद्मावतीचरणचारणचक्रवर्त्ती॥"
"चारणचक्रवर्त्ती नर्त्तकश्रेष्ठः।" इति तट्टीकायां चैतन्यदासः। यद्वा पद्मावती महालक्ष्मीः राधा तस्याश्चरणचारणे परिचर्य्यायां यच्चक्रं मण्डलं तत्र वर्त्तते इति व्युत्पत्त्या वैष्णवसम्प्रदायविशेषः॥)

चक्रवाकः, पुं स्त्री, ( चक्र इत्याख्यया उच्यतेऽसौ। वच+कर्म्मणि घञ्। ततो "न्यङ्क्वादीनाञ्च।" ७। ३। ५३। इति कुत्वम्। ) पक्षिविशेषः। चकाचकि इति भाषा॥ ( यथा, महाभारते। १। ६६। ५९।
"धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्व्वशः।
चक्रवाकांश्च भद्रं ते जनयामास सैव तु॥")
तत्पर्य्यायः। कोकः २ चक्रः ३ रथाङ्गाह्वयनामकः ४। इत्यमरः। २। ५। २२॥ भूरिप्रेमा ५ द्वन्द्वचारी ६ सहायः ७ कान्तः ८ कामी ९ रात्रिविश्लेषगामी १० रामावचोनोपमः ११ कामुकः १२। अस्य मांसगुणाः। लघुत्वम्। स्निग्धत्वम्। बलप्रदत्वञ्च। इति राजनिर्घण्टः॥ (यथा, चरके सूत्रस्थाने २७ अ।
"चक्रवाकास्तथान्ये च खगाः सन्त्यम्बुचारिणः।")

चक्रवाटः, पुं, ( चक्रेण चक्राकारेण वाटः वेष्टनं यस्य।) क्रियारोहः। पर्य्यन्तः। शिखातरुः। इति मेदिनी। टे। ६२॥

चक्रवाडं, क्ली, (चक्रवद् वाड़ते वेष्टयतीति। वाड़+अच्।) चक्रवालम्। इत्यमरटीकायां भरतः॥ पर्व्वतविशेषे पुं। इति मेदिनी। डे। १८॥

चक्रवातः, पुं, ( चक्रवद्वातः। तृणपांश्वादीन्यादाय चक्राकारेण भ्राम्यति यो वायुरिति यावत्।) भ्रमिवातः। घूर्णवातास इति भाषा॥ तत्पर्य्यायः। वात्या २। यथा, भागवते। १०। ७। २०।
"दैत्यो नाम्ना तृणावर्त्तः कंसभृत्यः प्रचोदितः।
चक्रवातस्वरूपेण जहारासीनमर्भकम्॥"

चक्रवालं, क्ली, (चक्रमिव वाड़ते वेष्टयतीति। वाड़+अच्। डस्य लत्वम्।) मण्डलाकारेण परिवर्त्तं समूहमात्रम्। मण्डलाकारो दिक्समूहः इति माधवी। इति भरतः॥ तत्पर्य्यायः। मण्डलम् २। इत्यमरः। १। ३। ६॥ (यथा, भागवते। ५। १८। १४।
"छित्वा गृहं संसृतिचक्रवालं
नृसिंहपादं भजताकुतोऽभयम्॥" )

चक्रवालः, पुं, ( चक्रेण चक्राकारेण वलते लोकालोकौ परिवेष्ट्य विराजते इत्यर्थः। वल+बाहुलकात् णः। अस्य पर्व्वतस्य लोकालोकपरिवेष्टनकारितया विराजमानत्वात्तथात्वम्।) लोकालोकपर्व्वतः। इत्यमरः।२।३।२॥ (मनुष्यादीनां मण्डलाकारेण स्थितिः। यथा, हरिवंशे।७६।३५।
"एवं स कृष्णो गोपीनां चक्रवालैरलङ्कृतः।
शारदीषु सचन्द्रासु निशासु मुमुदे सुखी॥")

चक्रवृद्धिः, स्त्री, ( चक्रमिव चक्रभ्रमणमिव वृद्धिः उत्तरोत्तरं वृद्धेरपि वृद्धिरित्यर्थः।) यत्र वृद्धिरूपं धनं दातुमशक्तोऽधमर्णः सवृद्धिकमिदं दास्यामीतिस्वीकरोति तत्र या वृद्धिः सा। सुदेर सुद इति भाषा। यथाह नारदः।
"वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता॥"
(तथाच मनुः। ८। १५३।
"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या।"
"कायिका कायसंयुक्ता मासग्राह्या च कालिका।
वृद्धेर्वृद्धिश्चक्रवृद्धिः कारिता ऋणिना कृता॥"
इति तट्टीकायां कुल्लूकभट्टधृतवृहस्पतिवचनम्॥)

चक्रव्यूहः, पुं, ( चक्रवत् मण्डलाकारेण रचितो व्यूहः रचनयाधिष्ठापितः सेनासमूह इति यावत्।) युद्धार्थमण्डलाकारेण सैन्यरचना। ( एतस्य रचनालक्षणादिश्चक्रशब्दे द्रष्टव्यः॥ व्यूहोऽयमभिमन्युवधेच्छुना भगवता द्रोणाचार्य्येणाभिकल्पितः। यथा, महाभारते। ७। ३३। १२—२३।
"चक्रव्यूहो महाराज! आचार्य्येणाभिकल्पितः।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः॥
अवस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्च्चसः।
सङ्घातो राजपुत्राणां सर्व्वेषामभवत्तदा॥
कृताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः।
रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः।
चन्दनागुरुदिग्धाङ्गाः स्रग्विणः सूक्ष्मवाससः॥
सहिताः पर्य्यधावन्त कार्ष्णिं प्रति युयुत्सवः।
तेषां दशसहस्राणि बभूवुर्दृढधन्विनाम्॥
पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम्।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः॥
अन्योन्यं स्पर्द्धमानाश्चाप्यन्योन्यस्य हिते रताः।
दुर्य्योधनस्तु राजेन्द्र! सैन्यमध्ये व्यवस्थितः॥
कर्णदुःशासनकृपैर्वृतो राजा महारथैः।
देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः॥
चामरव्यजनाक्षेपैरुदयन्निव भास्करः।
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः॥
सिन्धुराजस्तथाऽतिष्ठत् श्रीमान् मेरुरिवाचलः।
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः॥
सुतास्तव महाराज! त्रिंशत्त्रिदशसन्निभाः।
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा।
पार्श्वतः सिन्धुराजस्य विराजन्त महारथाः॥")

चक्रशल्या, स्त्री, ( चक्रवत् चक्राकारेण वा शल्यं यत्र।) काकतुण्डी। श्वेतगुञ्जा। इति राजनिर्घण्टः॥

चक्रश्रेणी, स्त्री, ( चक्रमिव चक्राणां वा श्रेणी यत्र।) अजशृङ्गीवृक्षः। इति रत्नमाला॥

चक्रसंज्ञं, क्ली, (चक्रेण वेदकयोगचक्रेण संज्ञायते इति। सं+ज्ञा+कः। चक्रस्य संज्ञा संज्ञा यस्य इति वा।) वङ्गम्। इति हेमचन्द्रः॥

चक्रसंवरः, पुं, (चक्रं अविद्याकामकर्म्मादिजन्यविषयवासनासमूहं इन्द्रियाणां समूहं वा संवृणोति संशमयतीति। सं+वृ+अच्।) बुद्धभेदः। तत्पर्य्यायः। हेरम्बः २ हेरुकः ३ देवः ४ वज्रकपाली ५ निशुम्भी ६ शशिशेखरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥

चक्रा, स्त्री, (चक् तृप्तौ+रक्। ततष्टाप्।) नागरमुस्ता। कर्कटशृङ्गी। इति राजनिर्घण्टः॥

चक्राङ्गी, स्त्री, (चक्रेण चक्राकारेण अङ्कते गच्छतीत्यर्थः। अकि गतौ+अच् ततो ङीष्।) हंसी। इति शब्दरत्नावली॥ चक्राकी च पाठः॥

चक्राङ्गः, पुं, स्त्री, ( चक्रेण चक्राकारेण अङ्गति गच्छतीति। अङ्ग+अच्) हंसः। इत्यमरः। २।५।२३॥ (यथा, महाभारते। ८।४१।२१।
"इदम्बपुःस चक्राङ्गा वचः काकं विहङ्गमाः॥"-
चक्रमङ्गमस्येति व्युत्पत्त्या रथोऽपि॥ (चक्र) वाकः। यथा, मनुः। ५। १२।
"कलविङ्कं प्लवं हंसं चक्राङ्गं ग्राम्यकुक्कुटम्॥")